कुर्य्याच्च नासावदनावरोधं
क्षीरं पिबेद्वाप्यथ मानुषीणाम् ॥
द्राक्षासितादाडिमजाम्बवानि
कह्लारनीलोत्पलपद्मवन्ति ।
पिबेत् कषायाणि च शीतलानि
पित्तज्वरं यानि च यापयन्ति ॥
शिरीषबीजगोमूत्रकृष्णामरिचसैन्धवैः ।
अञ्जनं स्यात् प्रबोधाय सरसोनशिलावचैः ॥”
अन्यच्च ।
“अञ्जनं सव्यगारक्षं मधुसिन्धुशिलोषणैः ।
प्रमोहघ्नोऽपि भवति भाषितं भिषजांवरैः ॥”
शिला मनःशिला । उषणं मरीचम् ।
“मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाम्भसा नस्यं कुर्य्यात् संज्ञाप्रबोधनम् ॥”
अथ रक्तजादीनां मूर्च्छानां चिकित्सा ।
“रक्तजायान्तु मूर्च्छायां हितः शीतक्रियाविधिः ।
मद्यजायां पिबेन्मद्यं निद्रां सेवेत वा सुखम् ।
विषजायां विषघ्नानि भेषजानि प्रयोजयेत् ॥”
अथ संन्यासस्य चिकित्सा ।
“प्रभूतदोषस्तमसोऽतिरेकात्
संमूर्च्छितो नैव विबुध्यते यः ।
संन्यस्तसंज्ञः स हि दुश्चिकित्स्यो
नरो भिषग्भिः परिकीर्त्तितोऽसौ ॥
अञ्जनान्यवपीड़श्च धूमाः प्रधमनानि च ।
सूचीभिस्तोदनं शस्तं दाहः पीड़ा नखान्तरे ।
लुञ्चनं केशलोम्नाञ्च दन्तैर्दंशनमेव च ।
आत्मगुप्तावघर्षश्च हितस्तस्य प्रबोधने ॥”
अवपीड़ः कल्कीकृतौषधरसस्य नासापुटे दानम् । तस्य संन्यस्तस्य ॥ * ॥ अथ मूर्च्छायां रसः ।
“कणामधुयुतं सूतं मूर्च्छायां प्राशयेद्‌ भिषक् ।
शीतसेकावगाहादि सर्व्वाङ्गे पीड़नं हठात् ॥”
सूतं मारितम् ।
“ताम्रचूर्णं समोशीरं केशरं शीतवारिणा ।
पीतं मूर्च्छां हतं चन्यात् इत्यभिज्ञाश्मनिर्णया ॥”
ताम्रचूर्णं मारितताम्रचूर्णम् ॥ * ॥ अथ भ्रमस्य चिकित्सा ।
पिबेद्दुरालभाक्वाथं सघृतं भ्रमशान्तये ।
पथ्याक्वाथेन संसिद्धं घृतं धात्रीरसेन वा ॥
शुण्ठीकृष्णाशताह्वानां साभयानां पलं पलम् ।
गुड़स्य षट् पलान्येषा गुटिका भ्रमनाशिनी ॥
ताम्रं दुरालभाक्वाथैः पीतन्तु घृतसंयुतम् ।
निवारयेद्‌भ्रमं शीघ्रं तं यथा शम्भुभाषितम् ॥”
अथ तन्द्राया अतिनिद्रायाश्चिकित्सा ।
“तुरङ्गलालालवणोत्तमेन्दु-
मनःशिलामागधिकामधूनि ।
नियोजितान्यक्षिणि चिनिश्चयेन
तन्द्रां सनिद्रां विनिवारयन्ति ॥”
इन्दुः कर्पूरम् ।
“सैन्धवं श्वेतमरिचं सर्षपः कुष्ठमेव च ।
वस्तमूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् ॥”
श्वेतमरिचं शिग्रुबीजम् ।
“शुण्ठीकणानागरसोषणानि
नस्येन तन्द्राधिजयोत्थयानि ।
क्षुद्रान्तताघौष्करनागराणि
भार्गीशिवाभ्यां कथितानि पानात् ॥”
शिवा हरीतकी । इति मूर्च्छाभ्रमतन्द्रातिनिद्रासंन्यासाधिकारः । इति भावप्रकाशः ॥
( अथास्यां पथ्यविधिः ।
“सेकावगाहौ मणयः सहाराः
शीताः प्रदेहा व्यजनानिलश्च ।
शीतानि पानानि च गन्धवन्ति
धारागृहं शीतमरीचिरोचिः ॥
धूमोऽञ्जनं नावनमस्रमोक्षो
दाहश्च सूचीपरितोदनानि ।
रोम्णां कचानामपि कर्षणानि
नखान्तपीड़ा दशनोपदंशः ॥
नासामुखद्वारमरुन्निरोधो
विरेचनच्छर्दनलङ्घनानि ।
क्रोधो भयं दुःखकरी च शय्या
कथा विचित्रा च मनोहरा च ॥
छायानभोऽम्भःशतधौतसर्पि-
र्मृदूनि तिक्तानि च जाङ्गलाः ।
जीर्णा यवा लोहितशालयश्च
कौम्भं हविर्मुद्गसतीनयूषाः ॥
धन्वोद्भवा मांसरसाश्च रागाः
खण्डोद्भवा गव्यपयः सिता च ।
पुराणकूष्माण्डपटोलमोच-
हरीतकीदाड़िमनारिकेलम् ॥
मधूकपुष्पाणि च तण्डुलीय
उपोदिकाम्लानि लघूनि चापि ।
उशीरनीरं सितचन्दनानि
कर्पूरनीरं हिमवालुका च ॥
ऋतुस्वशब्दोऽद्भुतदर्शनानि
गीतानि वाद्यान्यपि चोत्कटानि ।
श्रमः स्मृतिश्चिन्तनमात्मबोधा-
धैर्य्यञ्च मूर्च्छावति पथ्यवर्गः ॥”
अथापथ्यविधिः ।
“ताम्बूलं पत्रशाकानि दन्तघर्षणमातपम् ।
विरुद्धान्यन्नपानानि व्यवायं स्वेदनं कटुम् ।
स्वप्ननिद्रयोर्वेगरोधं तक्रं मूर्च्छामयी त्यजेत् ॥”
इति वैद्यकपथ्यापथ्यविधौ मूर्च्छाधिकारे ॥)

मूर्च्छालः, त्रि, (मूर्च्छा अस्त्यस्येति । “सिध्मादिभ्यश्च ।” ५ । २ । ९७ । इति लच् ।) मूर्च्छितः । इत्यमरः । २ । ६ । ६१ ॥

मूर्च्छितः, त्रि, ( मूर्च्छास्य संजाता । मूर्च्छा + तारकादित्वात् इतच् । ) मूर्च्छायुक्तः । तत्पर्य्यायः । मूर्त्तः २ मूर्च्छालः ३ । इत्यमरः ।२। ६ । ६१ ॥ ( यथा, भट्टौ । ६ । २३ ।
“तथाभ्यषिक्तवारीणि पितृभ्यः शोकमूर्च्छितः ।”) उच्छ्रयः । मूढ़ः । इति मेदिनी ॥ वृद्धः । इत्यजयः ॥ (व्याप्तः यथा, रामायणे ।२।११४।१८-२०।
“किं नु खल्वद्य गम्भीरो मूर्च्छितो न निशाम्यते ।
यथापुरमयोध्यायां गीतवादित्रनिस्वनः ॥
वारुणीमदगन्धश्च माल्यगन्धश्च मूर्च्छितः ।
चन्दनागुरुगन्धश्च न प्रवाति समन्ततः ॥” )

मूर्णः, त्रि, ( मुर्व्व बन्धे + क्तः । ) बद्धः । इति मूर्त्तशब्दटीकायां रायमुकुटः ॥

मूर्त्तः, त्रि, ( मूर्च्छ + क्तः “राल्लोपः ।” ६।४।२१। इति छलोपः । “न ध्याख्यापॄमूर्च्छिमदाम् ।” ८ । २ । ५७ । इति निष्ठातकारस्य नत्वाभावः । ) मूर्च्छितः । इत्यमरः । २ । ६ । ६१ ॥ कठिनः । मूर्त्तिमान् । इति मेदिनी । ते, ४५ ॥ न्यायमते पृथिवी जलं तेजः वायुः मनश्च । एषां गुणाः । रूपं रसः गन्धः स्पर्शः परत्वं अपरत्वं गुरुत्वम् । स्नेहः वेगश्च । मूर्त्तामूर्त्तसाधारणगुणाः । यथा, भाषापरिच्छेदे ।
संख्या परिमितिः पृथक्त्वं संयोगः विभागश्च ।
( यथा, मार्कण्डेये । २३ । ४७ ।
“यच्चामूर्त्तं यच्च मूर्त्तं समस्तं
यद्वा भूतेष्वेकमेकञ्च किञ्चित् ।
यदस्त्यस्ति क्ष्मातले खेऽन्यतो वा
त्वत्सम्बन्धं त्वत्स्वरैर्व्यञ्जनैश्च ॥” )

मूर्त्तिः, स्त्री, ( मूर्च्छ + क्तिन् । “न ध्याख्येति ।” ८ । २ । ५७ । इत्यस्मान्न तकारस्य नत्वम् । ) काठिन्यम् । शरीरम् । इत्यमरः । ३ । ३ ॥ ६६ ॥ ( यथा, मनौ । १२ । १२० ।
“खं सन्निवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलम् ।
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गाञ्च मूर्त्तिषु ॥”)
प्रतिमा । इति हेमचन्द्रः ॥ स्वरूपः । यथा,—
“आचार्य्यो ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः प्रजापतेः ।
भ्राता मरुत्पतेर्मूर्त्तिर्म्माता साक्षात् क्षितेस्तनुः ।
दयाया भगिनी मूर्त्तिर्धर्म्मस्यात्मातिथिः स्वयम् ।
अग्नेरभ्यागतो मूर्त्तिः सर्व्वभूतानि चात्मनः ॥”
इति श्रीभागवते । ६ । ७ । २९—३० ॥
( ब्रह्मसावर्णिपुत्रविशेषः । यथा, तत्रैव । ८ । १३ । २१—२२ ।
“तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ।
सुवासना विरुद्धाद्या जयो मूर्त्तिस्तदा द्विजाः ॥”)

मूर्त्तिमत्, क्ली, (मूर्त्तिः काठिन्यमस्यास्ति । मूर्त्ति + मतुप् । ) शरीरम् । इति हेमचन्द्रः ।३।२२७।

मूर्त्तिमान्, [ त् ] त्रि, (मूर्त्तिरस्यास्ति । मूर्त्ति + मतुप् । ) मूर्त्तिविशिष्टः । यथा,—
“मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान् ।”
इत्यादि श्रीभागवतम् ॥ (यथा च रघौ ।१२।६४।
“हृदयं स्वयमायातं वैदेह्या इव मूर्त्तिमत् ।”
कुशपुत्रः । यथा, हरिवंशे । २७ । १२ ।
“कुशपुत्रा बभूवुर्हि चत्वारो देववर्चसः ।
कुशिकः कुशनाभश्च कुशाम्बो मूर्त्तिमांस्तथा ॥”
स्त्रियां ङीप् । यथा, महाभारते ।१।१०८।१४ ।
“दर्शयामास तं गङ्गा तदा मूर्त्तिमती स्वयम् ।”)